International Journal of Sanskrit Research 2021; 7(5): 313-315

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 313-315
© 2021 IJSR
www.anantaajournal.com
Received: 07-07-2021
Accepted: 12-08-2021

डॉ. मुनमुन मल्लिक
सह शिक्षिका, सालकिया, ए. एस. हाई स्कूल, उ. मा., वेस्ट बंगाल, भारत

Corresponding Author:
डॉ. मुनमुन मल्लिक
सह शिक्षिका, सालकिया, ए. एस. हाई स्कूल, उ. मा., वेस्ट बंगाल, भारत

# प्रमाप्रमात्व समीक्षा

डॉ. मुनमुन मल्लिक

## प्रस्तावना

यथार्थायथार्थभेदेन अनुभवो द्विविधः स्वीक्रियते।
यथार्थानुभव एव प्रमेत्युच्यते।

तद्विशिष्ट वस्तुनि तत्पदार्थस्य अनुभव एव प्रमा। नव्यन्यायस्य प्रवर्त्तको महामति गङ्गेशोपाध्यायः प्रामाण्यवाद नामक-तद्विरचित ग्रन्थे तद्वति तत्प्रकारकोऽनुभवः एव प्रमा इत्युवाच [1]। अनुभव इति कथनात्यथार्थस्मृतिज्ञानस्य प्रमात्वं निराकृतम् भवति। स्मृतिर्नानुभव इति। स्मृतिस्तु संस्कारमात्रजन्या अनुभवभिन्नामिति (ज्ञानं) र्भवति। उक्तप्रकारेण प्रमाया निर्वचनात् तदभाववति तत्प्रकारक ज्ञानस्य अयथार्थत्वं सिद्धान्तितम् इति। किन्तु प्राभाकर मीमांसकमते अयथार्थज्ञानं नाभ्युपेयते प्रभाकरमते सर्वज्ञानं यथार्थमेव अयथार्थं न भवतीति। न्यायमते तु यथार्थायथार्थभेदेन द्विविधो ऽनुभवः स्वीक्रियते एव। न्यायमते तद्वति तत्प्रकारकज्ञानत्वम् प्रामाण्यपदार्थः। प्रभाकरमते तु तत्प्रकारकज्ञानत्वमेव प्रामाण्यम् [2]। प्रभाकरमतस्वीकारे शुक्तिकायाम् इदं रजतमिति ज्ञानस्य प्रमत्वापत्तिर्भवति। यतो रजतत्वाभाववति इदं विशेष्ये रजत-ज्ञानम् इदं रजतम् इति ज्ञानम् रजतत्वप्रकारकमेव भवति अतस्तज्ज्ञानस्य प्रमात्वापत्तिरवश्यमेव भवति।तेनैव तन्मतं नाभ्युपेयम्।

प्रभाकर मीमांसकमते सर्वं ज्ञानं यथार्थमेवाङ्गीक्रियते। अयथार्थं नास्वीक्रियत एतन्मते भ्रमस्थले ज्ञानद्वयम् अभ्युपेयते। यथा इदं रजतमिति भ्रमे इदमित्यंशः प्रत्यक्षम् रजतमित्यंशः स्मृतिरूपंज्ञानम्। इति ज्ञानद्वयम् अत्र कस्यापि ज्ञानस्य अयथार्थत्वं नास्ति। किञ्चत्र दोषवशात् भेदाग्रहोभवति अर्थात अत्रज्ञानद्वयमितिभेदस्य ग्रहो न भवति एवं इदंशात् रजतांशस्य च भेदग्रहोपि न जायते अर्थात् इयं शुक्तिका नेयं रजतम् इति विषययोः शुक्तिका-रजतयो-भेदोहपि न गृह्यते इति। इदं रजतमिति ज्ञानात् रजतानयने प्रवृत्तस्य प्रवृत्तिवैफल्यात् इदं ज्ञानम् अयथार्थमिति अवधार्यते। प्रभाकरमते ज्ञानं सर्वदैव मितिमातृमेयविषयकं भवति। घटेन सह चक्षुः सन्निकर्षात घटः घटमहं जानामि। इत्याकारमेव प्रत्यक्षं जायते एतन्मते ज्ञानं स्वप्रकाश स्वप्रकाशमेव स्वीक्रियते। ज्ञानम् इन्द्रियादिना उतपत्तिकाले एव आत्मानं-ज्ञानं विषयञ्च गृह्णत प्रकाशते। घटः घटमहं जानामि इत्याकार त्रिपुटी प्रत्यक्षात्मके ज्ञाने आत्मा, ज्ञानं घटादि विषयश्च प्रकाशते इति ज्ञानस्य स्वप्रकाशता। ज्ञानस्य अनुव्यवसायदि प्रकाश्यता एते न स्वीकुर्वन्ति। ज्ञानजनकेन इन्द्रियादिना ज्ञानं विषयीकृत्येव ज्ञानं प्रकाशते इति।

एतन् मतन्तु न युक्तिर्सहम। नियमस्तु विशिष्ट ज्ञानम् सर्वदैव विशेषण ज्ञानपूर्वकम् जायते आदौ विशेषण ज्ञानं भवति पश्चात् तद्विशिष्ट ज्ञानं जायते एष एव नियमः। एतं नियमम् अपाकृत्य घटः घटमहं जानामि एतादृशविशिष्टज्ञानम् एकदैव उत्पत्तुं न शक्नोति। तेनैव नैयायिका नियमविरुद्धम् मतमतेन नाद्रियन्ते।

अपरे मीमांसकाः यथा कुमारिलभट्ट मुरारिमिश्र प्रभृतयो मीमांसका ज्ञानस्य स्वप्रकाशरूपता नाभ्युपयन्ति। कुमारिलमते ज्ञानम् अनुमेयमेवभवति। ज्ञानानन्तरम् ज्ञातता लिङ्गक परामर्शेन ज्ञानस्य तथा ज्ञानगत प्रामाण्यस्य च ग्रहोभवति। यथा इयं ज्ञातता ततप्रकारक ज्ञानजन्या एतादृश ज्ञाततात्वात् इत्याकारानुमानेन गृह्यते।

मुरारिमिश्र मतेतु ज्ञानानन्तरमनुव्यवसायो भवति तेन अनुव्यवसायेन ज्ञानप्रामाण्यं गृह्यते [3]। सर्वेहपिमीमांसका ज्ञान प्रामाण्यस्य स्वतस्त्ववादिनः। नैयायिका ज्ञान प्रामाण्यस्य परतोग्राह्यत्ववादिनः इति। ज्ञानप्रामाण्यस्य स्वतोग्राह्यत्व स्वीकारे ज्ञानानुव्यवसायानन्तरं प्रमात्वसंशयो नस्यादिति। मदीयं ज्ञानमेतत् प्रमा न वेति संशयसम्भवात् ज्ञानप्रामाण्यस्य स्वतोग्राह्यत्वं स्वीकर्त्तुं न शक्यते। प्रमात्वं न स्वतोग्राह्यम् संशयानुपपपत्तितः।।'' इति स्मर्त्तव्यम्।

न्यायवैशेषिकमते तद्वति तत्प्रकारकज्ञानत्वमेव प्रामाण्यं न तु तत्प्रकारकज्ञानत्वमात्रम्। इदमत्र वक्तव्यम्- तत्प्रकारकत्वस्य (ज्ञानत्वस्यवा) अनुव्यवसायग्राह्यत्वम् न्यायमते ऽपि मीमांसकवत स्वीक्रियते यथा घटे चक्षुः सन्निकर्षानन्तरं घटप्रत्यक्षेजाते घटमहं पश्यामि वाजानामि एतादृशानुव्यवसायो भवति एतादृशानुव्यवसाये ज्ञाने

घटत्व प्रकारकत्वम् अर्थात् तत्प्रकारकत्वं गृह्यते ज्ञान विषयक ज्ञानेन गृह्यते (अनुव्यवसायेन गृह्यते)। ज्ञानस्य तत्प्रकारकत्वांशः स्वतोग्राह्यो ऽनुव्यवसायग्राह्यो भवति। पुरः स्थितं बस्तु घटत्व प्रकारेण जानाति इति सत्यम् किन्तु तद्वस्तु घट एव नान्यः एतन्न ज्ञातुं शक्नोति तात् पर्यन्तु घटत्वविशिष्टमेव घटत्ववत्तया जानामि एतादृशं ज्ञानन्तु न भवति अनुव्यवसायेन-अतएव तद्वति तत्प्रकारकत्वांश अज्ञातमेव अवतिष्ठते तदेव प्रामाण्यपदार्थः न्यायमते तद्वद्विशेष्यक तत्प्रकारकत्वमेव प्रामाण्यपदार्थः। अतः प्रामाण्यस्य तत्प्रकारकत्वांशस्य अनुव्यवसायग्राह्यत्वरूप स्वतोग्राह्यत्वस्य सम्भवे ऽपि तद्वद्विशेष्यकतत्प्रकारकत्वरूप समप्रभागात्मक प्रामाण्यस्य अनुव्यवसायग्राह्यता (स्वतोग्राह्यता) कदापि न सम्भवति। प्रामाण्यम् परतः अनुमानात् अनुमानेन वा ग्राह्यमेव इति प्रामाण्यस्य परतोग्राह्यत्ववादिनो नैयायिकाः बदन्ति।

न्यायदर्शन भाष्यकारेण प्रक्षिलस्वामिना वात्स्यायनेन न्यायदर्शनस्य आदिभाष्ये ''प्रमाणतो ऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्याद् अर्थवत् प्रमाणमिति उपदिश्य ज्ञानप्रामाण्यस्य अनुमान प्रमाणग्राह्यत्वरूप-परतोग्राह्यत्वमेव ब्यवस्थापयामास [4]। तथाच इदं ज्ञानं प्रमा संवादिप्रव त्तिजनकत्वात् इत्याकार अनुमानेन ज्ञानगत प्रामाण्यम् अवधार्यते (अनुमीयते)। ज्ञानप्रामाण्यावधारणे अन्यपन्था नास्ति। सकऽनैयायिक गुरुभाष्यकार दर्शित दिशा सर्वे नैयायिकाः ज्ञान प्रामाण्यस्य परतस्त्ववादिनो ऽभवन्। पुरोवर्त्तिनि-वस्तुनि चक्षुः सम्पकानन्तरं घट घटत्वे इत्याकार निर्विकल्पकमेव ज्ञानं जायते। तदनन्तरं घटत्ववत्तया घट इति विशिष्ट ज्ञानं सम्भवति। विशिष्ट ज्ञानं प्रति विशेषणज्ञानस्य कारणत्वाभ्युपगमात् तेन निर्विकल्पकज्ञानरूपं विशेषण ज्ञानम् अवश्यमभ्युपेयम्। नियमो ऽयम् प्रत्यक्षज्ञानस्यक्षेत्रे ज्ञातव्यम् अनुमिति शाव्दवोधोपमितिषु निर्विकल्पकज्ञानपूर्वकत्वं नाङ्गीक्रियते हति। प्रत्यक्षं प्रति चक्षुरादीनामिन्द्रियाणां करणत्वम् स्वीक्रियते-इन्द्रियम् करणंमतमिति शास्त्रोक्तम्। इन्द्रियेण सह घटादिविषयाणाम् सम्बन्ध एव सन्निकर्ष इति भाष्यते। स एव सन्निकर्षो व्यापार इति। ततो घटादीनां प्रत्यक्षं जायते। तदनन्तरं मदीयम् ज्ञानमिदं यथार्थं नवेति सन्देहोदये घटमाने तुं प्रवृत्तस्य घटं प्राप्य स्वकीय प्रवृत्तेः साफल्यमनुभूय मदीयं ज्ञानमिदं यथार्थम् प्रवृत्तिसाफल्यात् एवमनुमानेन निश्चीयते ज्ञानस्य प्रामाण्यम् (प्रमात्वमिति) न्यायमतम् [5]।। संयोगः, संयुक्त समवायः, संयुक्तसमवेतसमवायः, समवायः, समवेत समवायः, विशेष्य विशेषणभावः इति षड्भिः सन्निकर्षैः चक्षुरादीन्द्रियेन षड्विधं प्रत्यक्षं जायते। एवञ्च इन्द्रियार्थ संयोगेन द्रव्यप्रत्यक्षम् इन्द्रिय संयुक्त समवाय सन्निकषेण द्रव्यवृत्ति गुण कर्मजातीनां, इन्द्रिय संयुक्त समवेत समवायेन रूपत्व गमनत्वादीनां, समवायसन्निकषेण श्रोत्रेण शब्दस्य, श्रोत्रसमवेत समवायसन्निकर्षेण शब्दत्वस्य, विशेष्यविशेषण भाव सन्निकर्षेण घटाभाववद्भूतलम् इति घटाभावस्य चक्षुरादीन्द्रियेन प्रत्यक्षं भवति।

विशेष्यविशेषणभाव सन्निकर्षस्तु विशेष्यभावस्यविशेष्यता रूपता सातुविशेष्य एव तिष्ठति विशेषणे न वर्त्तते। विशेषणभावस्यतु विशेषणतारूपता सा तु विशेषणे एव अवतिष्ठते विशेष्ये नावतिष्ठते। इत्यनयोः सम्वन्धत्वं नोपपद्यते सम्वन्धस्तु सम्वम्बिभ्यां भिन्नःसन् सम्वन्धिनोर्वर्त्तते। यथा संयोगेन घटबद्भूतलमित्यत्र घटभूतलयोः-सम्बन्धिनोः भिन्नः सन् संयोगः घटे भूतले च वर्त्तते इति एवं रूपेण विशेष्यता विशेषणता सम्वन्धः उभयसम्वन्धिनोः घटाभाववद् भूतलम् इत्यत्र घटाभावभूतलयोर्नवर्त्तते। घटाभावे विशेषणता भूतले च विशेष्यता वर्त्तते। घटाभावभूतलवृत्तिः (सम्बन्धिनोः वृत्तिः) न कापि भवति तेनैव विशेषणतया तद्वद् अभावानां ग्रहोभवेदिति उक्तिः कथं सङ्गच्छते। विशेषणता सम्वन्धेन अभावानां प्रत्यक्षमिति उक्तिः कथं सङ्गच्छते इति।

अत्रोच्यते यदि च विशेषणता विशेष्यतयोः सम्बन्धत्वंनाभ्युपेयते तथापि चक्षुःसंयुक्तभूतलनिष्ठ विशेष्यतानिरूपकविशेषणता-वत्तया चक्षुषा भूतल वृत्ति घटाभाव प्रत्यक्षतामियात। एतादृशपरम्परास्वीकारे न काप्यनुपपत्तिः [6]। तात्पर्यन्तुविशेष्यताया विशेषणतायाश्च प्रत्येकपर्यवसन्नत्वे ऽपि तयोः सम्बन्धत्वाभावे ऽपि (उभयावृत्तित्वे ऽपि) दर्शित प्रकारेण घटाभावादिप्रत्यक्षे न कापि बाधेति। तथाच भूतले घटाभाव इत्यत्र भूतलवृत्ति विशेषणता निरूपित अभावनिष्ठ विशेष्यता (चक्षुः संयुक्त तथाविध विशेष्यता वत्तया) चक्षुषा घटाभावस्य प्रत्यक्षमुपपद्यते।। एवञ्च घटाभाववद्भूतलमित्यत्र चक्षुः संयुक्त भूतलनिष्ठ विशेष्यता निरूपक विशेषणता अत्रस्थले घटाभावे वर्त्तते अत एतादृश-विशेषणता वत्तया-चक्षुषा घटाभावस्य प्रत्यक्षे न कापि बाधा इति।

किञ्चात्र विचार्यते वाचकशव्दसहितः सन्नेव विषयो ज्ञायते वाचकशव्दं परिहृत्य केवल विषयज्ञानम् न भवति। यथा- घट इति प्रत्यक्षम् घटरूपार्थस्य वाचक घटशव्देन अन्वितघटार्थ विषयकं भवति। एवञ्च घट इति प्रत्यक्म् निर्विकल्पक घट प्रत्यक्षपूर्वकम् भवितुं नार्हति। यत उक्तमते वाचकशव्देन सम्पर्कतया सर्वेविषया विशिष्टा सन्तः एव ज्ञायन्ते अविशिष्ट विषय विषयक ज्ञानं न भवति। एतन् मतन्तु-शव्दानुविद्धतावादः वैयाकरणा आद्रियन्ते। अन्ये शास्त्राचार्या एतन्मतं न स्वीकुर्वन्ति। शव्दो ऽस्य विषयत्वेन जनको ऽर्थतादात्म्यात्। किन्त्वत्र यादृशो ऽर्थ अज्ञात एव पूर्वमासीत् तादृशार्थस्य प्रत्यक्षादौ तदीय वाचकशव्द विषयकत्वं कथं सम्भवेत् एतादृशस्थले वाचकशव्द परिहारेणैव केवलार्थस्य प्रत्यक्षादिकं भवतीति स्वीकर्त्तव्यम्।

वालमूकादीनामपि ज्ञानम केवलार्थविषयकमेव भवतीति अभ्युपेतव्यम्।

तेनैव '' न सो ऽस्थि प्रत्ययोलोके यः शव्दानुगमादृते [7]।
अनुविद्धमिवज्ञानं सर्वं शव्देन भासते''।। मतमिदं न उररीकर्त्तव्यमिति।

अत्र तु न्यायभाष्यकार पक्षिलस्वामिनः (वात्स्यायनस्य) मतं यादृश शव्दार्थयोर्वाच्यवाचकभावः सुज्ञातः तादृशस्थले ऽपि विषयेण सह इन्द्रिय-सम्पर्कात् वाचक शव्द परिहारेण विषयमात्रस्यैव प्रथमं प्रत्यक्षं जायते ततो बाच्यता सम्बन्धेन वाचकशव्द विशिष्ट तदर्थ स्तस्मिन्नेव प्रत्यक्षे भासते। यथा स्तनन्धय शिशोःमूकस्य वा वाचक शव्दपरिहारेण विषयमात्रस्य प्रत्यक्षं जायते। तथैव सुज्ञातस्थले ऽपि इन्द्रिय सन्निकर्षात् प्रथमं ज्ञानमुत्पद्यते इति [8]।

तत एक सम्वन्धि ज्ञानमपर सम्वन्धिनं स्मारयति इति नियमेन-वाचकशव्दस्य स्मरणात् तद्वाच्यता तादृशार्थे गृह्यते। ततो वाचकशव्द विशिष्टः सो ऽर्थो ज्ञायते इति। यत्र तु वाचकशव्दो न स्मर्यते तत्र वस्तुमात्रस्यैव ज्ञानं भवतीति।

न्यायभाष्यकारमतेतु-फलायोगव्यवच्छिन्नकारणं करणं मन्यते [9]। तथाच प्रत्यक्ष-ज्ञानस्य अव्यवहित पूर्ववर्त्ति कारणमेव करणमित्यभ्युपेयते। तेन विषयेन्द्रिय सम्वन्धस्य सन्निकर्षस्यैव प्रत्यक्षे करणत्वम्। नव्यमते चक्षुरादि इन्द्रियाणामेव करणत्वम् स्वीकृतम्। इन्द्रियं करणं मतम् इति। भाष्यमते अक्षस्य अक्षस्य प्रतिविषयं वृत्तिः प्रत्यक्म् वृत्तिस्तु सन्निकर्षो ज्ञानं वा [10]। भाष्यकारादिमते-इन्द्रियार्थ सन्निकर्षजन्य निर्विकल्पक घटादि प्रत्यक्षं प्रति इन्द्रियम् प्रमाणम्। निर्विकल्पक प्रत्यक्षन्तु प्रमा [11]।

निर्विकल्पक प्रत्यक्षानन्तरं घटादीनां विशिष्ट प्रत्यक्षंप्रति प्रतिइन्द्रियार्थ-सन्निकर्षः प्रमाणम् विशिष्ट अयं घट इति प्रात्यक्षं तु प्रमा। घटादीनां विशिष्ट प्रत्यक्षानन्तरं हानोपादानोपेक्षावुद्धिं (प्रत्यक्षं) प्रति विशिष्ट प्रत्यक्षन्तु प्रमाणम् हानोपादानोपेक्षावुद्धिः (प्रत्यक्षन्तु) प्रमा ।

घटत्वविशिष्टं घटं दृष्ट्वा पूर्वकार्य साधक पूर्वघटजातीयो ऽयं घटः इति प्रत्यक्षन्तु उपादान प्रत्यक्षम्। तदनन्तरं स घट उपादीयते। तेन तत्प्रत्यक्षमुपादान-प्रत्यक्षम्। (बुद्धिः) घटं दृष्ट्वा पूर्ववर्त्तिमन्दघट तुल्योऽयं घट इति प्रत्यक्षन्तु हान प्रत्यक्षम् (हानवुद्धिः) यया स घटः परित्यज्यते। घटं दृष्ट्वा पूर्ववद ग्राह्य त्याज्य भिन्नो ऽयं घट इति प्रत्यक्षन्तु उपेक्षा प्रत्यक्षम् (उपेक्षा वुद्धिः) यया वुद्ध्या लोकः तादृशं घटमुपेक्षते। भाष्यकारादयः प्राचीनाः प्रत्यक्षे ज्ञानस्य करणत्वं स्वीकुर्वन्ति। नव्यमते प्रत्यक्षप्रमायां ज्ञानस्य करणत्वं नस्वीक्रियते। नव्यमते ज्ञानाकरणक ज्ञानत्वं प्रत्यक्ष प्रमा लक्षणम्। तथाच प्रत्यक्षप्रमायां ज्ञानं करणं न भवतीति भावः। अनुमितौ उपमितौ शाव्दवोधे च व्याप्तिज्ञानं सादृश्यज्ञानं पदज्ञानञ्च करणं भवति नव्यमते प्रत्यक्षे इन्द्रियमेव करणभवति न ज्ञानमिति [12]।

**तथ्यसूत्र :**

१. ‘‘यत्र यदास्ति तस्यानुभव प्रमा तद्वति ततप्रकारकोऽनुभवोवा’’ प्रमालक्षणसिद्धान्ते गङ्गेशोपाध्यायेन उक्तम्।
२. प्राभाकरमते ‘‘सर्वज्ञानानाम् यथार्थत्वात तत्प्रकारक ज्ञानत्वमेव प्रमात्वम्’’। (भीमाचार्यकृत न्यायकोश प्रत्यक्षखण्ड ४०१ पृः)
३. तत्त्वचिन्तामणौ प्रामाण्यवादे यदुक्तम् तदेव अत्र उल्लिखितम्।
४. न्यायदर्शने प्रथमसूत्रस्य आदिभाष्ये भाष्यकारेण उक्तम्।
५. ‘‘प्रमात्वं न स्वतोग्राह्यं संशयानुपत्तितः’’ इति कारिकाया मुक्तावल्याम् एतादृश्य व्याख्यानम् विश्‍वनाथेन कृतम्।
६. केशवमिश्रकृत तर्कभाषा ग्रन्थे अभाव प्रत्यक्षप्रकरणे दृश्यते।
७. भर्त्तृहरिकृत वाक्यपदीये।
८. न्यायदर्शने प्रत्यक्षसूत्रीयभाष्ये भाष्यकारेण उक्तम्।
९. प्रचीन न्यायमतमिदम् न्यायभाष्ये दृश्यते।
१०. प्रत्यक्षानुमानोपमानशव्दा प्रमाणनि इति न्यायदर्शनस्य प्रमाणसूत्रीय भाष्यमिदम्।
११. केशम मिश्रकृत तर्कभाषाग्रन्थे अस्ति।
१२. उक्तलिखनस्य मूलम् भाषापविच्छेदस्य मुक्तावली ग्रन्थे।

**ग्रन्थपञ्जि :**

१. न्यायदर्शन प्रामाण्यवाद, मतिलाल वेनारसी दास, दिल्ली, पाटना, वाराणसी (१३८५)
२. भाषापरिच्छेद मुक्तावली, विजयायन ८ वि, कलेज रोड, कोलकाता- ७००००९ (माघ-१४१३)
३. भीमाचार्यकृत न्यायकोश, चौखाम्वा सुरभारती प्रकाशन, वाराणसी (रि-प्रिन्ट जुलाइ २०११)
४. तर्कसंग्रह, दीपान्विता अमावश्या २००६ , प्रकाशक १४३ए, रासविहारी एभेनिउ, कोलकाता-७०००२९